2026

UGVYDS404

न्यायसिद्धान्तमुक्तावली

चतुर्थपत्रम्

पूर्णाङ्काः – 60

समयः – सार्धघण्टाद्वयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् - **1×10=10**

1. न्यायसिद्धान्तमुक्तावली कस्य ग्रन्थस्य व्याख्या अस्ति ?
2. सामान्यस्य किं लक्षणम् ?
3. किन्नाम कारणत्वम् ?
4. पृथिव्याः कति गुणाः सन्ति ?
5. तेजसः को विशेषगुणः?
6. का नाम दिक् ?
7. आत्मनः कति गुणाः सन्ति ?
8. को नाम सन्निकर्षः ?
9. वैशेषिकदर्शनस्य प्रवर्तकः कः ?
10. आकाशस्य कति गुणाः ?

अधस्तनेषु प्रश्नेषु पञ्च समाधेयाः - **6×5=30**

11. न्यायसिद्धान्तमुक्तावल्याः मङ्गलाचरणं विलिख्य व्याख्येया।
12. 'सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते' इति कारिकांशं व्याख्यायत।
13. न्यायसिद्धान्तमुक्तावल्यनुसारम् आकाशं निरूपयत।
14. 'त्वचो योगो मनसा ज्ञानकारणम्' इति कारिकांशः व्याख्येयः।
15. द्रव्याणि कति? न्यायसिद्धान्तमुक्तावलीदिशा व्याख्यायत।
16. 'अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता' इति व्याख्येया।
17. 'उष्णःस्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्'इत्यस्य व्याख्या कार्या।

अधोलिखितेषु प्रश्नेषु द्वौ समाधेयौ - **10×2=20**

18. मङ्गलस्य कर्तव्यतां पूर्वपक्षनिरसनपूर्वकं न्यायसिद्धान्तमुक्तावलीदिशा प्रतिपाद्यताम्।
19. न्यायसिद्धान्तमुक्तावलीदिशा सप्तपदार्थानां परस्परसाधर्म्यं निरूपयत।
20. तेजसः किं लक्षणम् ? तस्य स्पर्शरूपादीन् निरूप्य भेदान् प्रदर्शयत।
21. प्रत्यक्षस्य लक्षणं तस्य भेदांश्च सम्यक् प्रतिपाद्यताम्।

****